# .. shivAShTakam 3 by Adi ShankarAcharya ..

## ॥ शिवाष्टकम् ३ ॥

तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्ज्वलितपिङ्गललोचनाय ॥
नागेन्द्रहारकृतकुण्डलभूषणाय
ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥ १॥

श्रीमत्प्रसन्नशशिपन्नगभूषणाय
शैलेन्द्रजा वदन चुम्बितलोचनाय ॥
कैलासमन्दिरमहेन्द्रनिकेतनाय
लोकत्रयार्तिहरणाय नमः शिवाय ॥ २॥

पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागरुप्रचुरचन्दनचर्चिताय ॥
भस्मानुषक्तविकचोत्पलमल्लिकाय
नीलाब्जकण्ठसदृशाय नमः शिवाय ॥ ३॥

लम्बत्सपिङ्गल जटामुकुटोत्कटाय
दंष्ट्राकरालविकटोत्कटभैरवाय ॥
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथ नमिताय नमः शिवाय ॥ ४॥

दक्षप्रजापतिमहामखनाशनाय
क्षिप्रं महात्रिपुरदानवघातनाय ॥
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय
योगाय योगनमिताय नमः शिवाय ॥ ५॥

संसारसृष्टिघटनापरिवर्तनाय
रक्षः पिशाचगणसिद्धसमाकुलाय ॥
सिद्धोरगग्रह गणेन्द्रनिषेविताय
शार्दूल चर्मवसनाय नमः शिवाय ॥ ६॥

भस्माङ्गरागकृतरूपमनोहराय
सौम्यावदातवनमाश्रितमाश्रिताय ॥

गौरीकटाक्षनयनार्ध निरीक्षणाय
गोक्षीरधारधवलाय नमः शिवाय ॥७॥

आदित्यसोमवरुणानिलसेविताय
यज्ञाग्निहोत्रवरधूमनिकेतनाय ॥
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय
गोपाय गोपनमिताय नमः शिवाय ॥८॥

शिवाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

श्री शंकराचार्यकृतं शिवाष्टकं सम्पूर्णम् ।

Encoded and proofread by Daksha Dalal

---

Please send corrections to sanskrit@cheerful.com
Last updated January 23, 2011
http://sanskritdocuments.org